# Matristotram by Vyasa Maharshi

# व्यासकृतम् मातृस्तोत्रम्

## Document Information

Text title : mAtRistotram vyAsakRitam Hymn for the Mother by Vyasa Maharshi

File name : mAtRRistotraMvyAsakRRitam.itx

Category : deities_misc, vyAsa, bRihaddharmapurANam

Location : doc_deities_misc

Author : Vyasa

Proofread by : NA

Description/comments : Brihaddharmapuranam | pUrvakhaNDaH | adhyAyaH 2| 3347 ||

Latest update : March 27, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 27, 2023

*sanskritdocuments.org*

# व्यासकृतम् मातृस्तोत्रम्

व्यास उवाच ।
पितुरप्यधिका माता गर्भधारणपोषणात् ।
अतो हि त्रिषु लोकेषु नास्ति मातृसमो गुरुः ॥ १॥

नास्ति गङ्गासमं तीर्थं नास्ति विष्णुसमः प्रभुः ।
नास्ति शम्भुसमः पूज्यो नास्ति मातृसमो गुरुः ॥ २॥

नास्ति चैकादशीतुल्यं व्रतं त्रैलोक्यविश्रुतम् ।
तपो नानशनात् तुल्यं नास्ति मातृसमो गुरुः ॥ ३॥

नास्ति भार्यासमं मित्रं नास्ति पुत्रसमः प्रियः ।
नास्ति भगिनीसमा मान्या नास्ति मातृसमो गुरुः ॥ ४॥

न जामातृसमं पात्रं न दानं कन्यया समम् ।
न भ्रातृसदृशो बन्धुर्नच मातृसमो गुरुः ॥ ५॥

देशो गङ्गान्तिकः श्रेष्ठो दलेषु तुलसीदलम् ।
वर्णेषु ब्राह्मणः श्रेष्ठो गुरुर्माता गुरुष्वपि ॥ ६॥

पुरुषः पुत्ररूपेण भार्यामाश्रित्य जायते ।
पूर्वभावाश्रया माता तेन सैव गुरुः परः ॥ ७॥

मातरं पितरञ्चोभौ दृष्ट्वा पुत्रस्तु धर्मवित् ।
प्रणम्य मातरं पश्चात् प्रणमेत् पितरं गुरुम् ॥ ८॥

माता धरित्री जननी दयार्द्र हृदया शिवा ।
देवी भूरवनिः श्रेष्ठा निर्दोषा सर्वदुःखहा ॥ ९॥

आराधनीया परमा दया शान्तिः क्षमा धृतिः ।
स्वाहा स्वधा च गौरी च पद्मा च विजया जया ॥ १०॥

दुःखहन्त्रीति नामानि मातुरेवैकविंशतिम् ।

शृणुयाच्छ्रावयेन्मर्त्यः सर्वदुःखाद् विमुच्यते ॥ ११॥

दुःखैर्महद्भिर्दूनोऽपि दृष्ट्वा मातरमीश्वरीम् ।
यमानन्दं लभेन्मर्त्यः स किं वाचोपपद्यते ॥ १२॥

इति ते कथितं विप्र मातृस्तोत्रं महागुणम् ।
पराशरमुखात् पूर्वमश्रौषं मातृसंस्तुतम् ॥ १३॥

सेवित्वा पितरौ कश्चिद् व्याधः परमधर्मवित् ।
लेभे सर्वज्ञतां या तु साध्यते न तपस्विभिः ॥ १४॥

तस्मात् सर्वप्रयत्नेन भक्तिः कार्या तु मातरि ।
पितर्यपीति चोक्तं वै पित्रा शक्तिसुतेन मे ॥ १५॥

॥ इति बृहद्धर्मपुराणान्तर्गतं पितृमातृभक्तिर्नाम
द्वितीयोऽध्यायान्तर्गतं व्यासप्रोक्तं मातृस्तोत्रं सम्पूर्णम् ।

॥ बृहद्धर्मपुराणम् । पूर्वखण्डः । अध्यायः २। ३३-४७ ॥

In the second chapter of the BrihaddharmapurANam,
this stotra is followed after pitRistotram,
a hymn on father.

*Matristotram by Vyasa Maharshi*

pdf was typeset on March 27, 2023

Please send corrections to *sanskrit@cheerful.com*